# sarvashAstrArtha aNu bhAShya ( AnandatIrtha)

# સર્વશાસ્ત્રાર્થ અણુ ભાષ્ય ( આનન્દતીર્થ)

## Document Information


Text title : sarvashAstrArtha aNu bhAShya (AnandatIrtha)

File name : aNu_bhAshhya.itx

Category : vedanta, yoga

Location : doc_yoga

Transliterated by : Shrisha Rao shrao at dvaita.org

Proofread by : Shrisha Rao shrao at dvaita.org

Latest update : November 1, 2010

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.



November 21, 2022

*sanskritdocuments.org*

sarvashAstrArtha aNu bhAShya ( AnandatIrtha)

# સર્વશાસ્ત્રાર્થ અણુ ભાષ્ય ( આનન્દતીર્થ)

સર્વશાસ્ત્રાર્થસંગ્રહઃ

Encoded and proofread by Shrisha Rao shrao at dvaita.org

॥ શ્રી ગુરુભ્યો નમઃ હરિઃ ૐ ॥

ૐ વિષ્ણુરેવ વિજિજ્ઞાસ્યઃ સર્વકર્તાઽગમોદિતઃ ।
સમન્વયાદીક્ષતેશ્ચ પૂર્ણાનન્દોઽંતરઃ ખવત્ ॥ ૧.૧॥

પ્રણેતા જ્યોતિરિત્યાદૈઃ પ્રસિદ્ધૈરન્યવસ્તુષુ ।
ઉચ્યતે વિષ્ણુરેવૈકઃ સર્વૈઃ સર્વ ગુણત્ત્વતઃ ॥ ૧.૨॥

સર્વગોઽત્તા નિયંતા ચ દૃશ્યત્ત્વાદુજ્ઝિતઃ સદા ।
વિશ્વજીવાંતરત્ત્વાદૈર્લિઙ્ગૈઃ સર્વૈર્યુતઃ સ હિ ॥ ૧.૩॥

સર્વાશ્રયઃ પૂર્ણગુણઃ સોઽક્ષરઃ સન્ હૃદબ્જગઃ ।
સૂર્યાદિભાસકઃ પ્રાણપ્રેરકો દૈવતૈરપિ ॥ ૧.૪॥

જ્ઞેયો ન વેદૈઃ શૂદ્રાદૈઃ કન્દકોઽન્યશ્ચ જીવતઃ ।
પતિત્ત્વાદિગુણૈર્યુક્તઃ તદન્યત્ર ચ વાચકૈઃ ॥ ૧.૫॥

મુખ્યતઃ સર્વશબ્દૈશ્ચ વાચ્ય એકો જનાર્દનઃ ।
અવ્યક્તઃ કર્મવાચ્યૈશ્ચ વાચ્ય એકોઽમિતાત્મકઃ ॥ ૧.૬॥

અવાન્તરં કારણં ચ પ્રકૃતિઃ શૂન્યમેવ ચ ।
ઇત્યાદન્યત્ર નિયતૈરપિ મુખ્યતયોદિતઃ ।
શબ્દૈરતોઽનન્તગુણો યચ્છબ્દા યોગવૃત્તયઃ ॥ ૧.૭॥

॥ ઇતિ પ્રથમોઽધ્યાયઃ ॥

॥ અથ દ્વિતીયોઽધ્યાયઃ ॥

ૐ શ્રૌતસ્મૃતિવિરુદ્ધત્ત્વાત્ સ્મૃતયો ન ગુણાન્હરેઃ ।

નિષેદ્ધું શક્નુયુર્વેદાનિત્યત્વાન્માનમુત્તમમ્ ॥ ૨.૧॥

અસજ્જીવપ્રધાનાદિશબ્દાબ્રહ્મૈવ નાપરમ્ ।
વદન્તિ કારણત્વેન ક્વાપિ પૂર્ણગુણો હરિઃ ॥ ૨.૨॥

સ્વાતન્ત્ર્યાત્સર્વકર્તૃત્વાન્નાયુક્તં તદ્ભવેચ્છ્રુતિઃ ।
ભ્રાન્તિમૂલતયા સર્વ સમયાનામયુક્તિતઃ ॥ ૨.૩॥

ન તદ્વિરોધાદ્વચનં વૈદિકં શઙ્ક્યતાં વ્રજેત્ ।
આકાશાદિસમસ્તં ચ તજ્જં તેનૈવ લીયતે ॥ ૨.૪॥

સોઽનુત્પત્તિલયઃ કર્તા જીવઃ તદ્વશગઃ સદા ।
તદાભાસો હરિઃ સર્વ રૂપેષ્વપિ સમઃ સદા ॥ ૨.૫॥

મુખ્યપ્રાણશ્ચેન્દ્રિયાણિ દેહશ્ચૈવ તદુદ્ભવાઃ ।
મુખ્યપ્રાણવશે સર્વં સ વિષ્ણોર્વશગઃ સદા ॥ ૨.૬॥

સર્વ દોશોજ્ઝિતઃ તસ્માદ્ ભગવાન્ પુરુષોત્તમઃ ।
ઉક્તા ગુણાશ્ચાવિરુદ્ધાસ્તસ્ય વેદેષુ સર્વથા ॥ ૨.૭॥

॥ ઇતિ દ્વિતીયોઽધ્યાયઃ ॥

॥ અથ તૃતીયોઽધ્યાયઃ ॥

ૐ શુભેન કર્મણા સ્વર્ગં નિરયં ચ વિકર્મણા ।
મિથ્યાજ્ઞાનેન ચ તમો જ્ઞાનેનૈવ પરં પદમ્ ॥ ૩.૧॥

યાતિ તસ્માદ્વિરક્તઃ સન્ જ્ઞાનમેવ સમાશ્રયેત્ ।
સર્વાવસ્થાપ્રેરકશ્ચ સર્વરૂપેષ્વભેદવાન્ ॥ ૩.૨॥

સર્વદેશેષુ કાલેષુ સ એકઃ પરમેશ્વરઃ ।
તદ્ભક્તિસ્તારતમ્યેન તારતમ્યં વિમુક્તિગમ્ ॥ ૩.૩॥

સચ્ચિદાનન્દ આત્મેતિ માનુષૈસ્તુ સુરેશ્વરૈઃ ।
યથા ક્રમં બહુગુણૈર્બ્રહ્મણાત્ત્વખિલૈર્ગુણૈઃ ॥ ૩.૪॥

ઉપાસ્યઃ સર્વદેવૈશ્ચ સર્વૈરપિ યથા બલમ્ ।
જ્ઞેયો વિષ્ણુર્વિશેષસ્તુ જ્ઞાને સ્યાદુત્તરોત્તરં ॥ ૩.૫॥

સર્વેઽપિ પુરુષાર્થાસ્યુઃ જ્ઞાનાદેવ ન સંશયઃ ।
ન લિપ્યતે જ્ઞાનાવંશ્ચ સર્વદોષૈરપિ ક્વચિત્ ॥ ૩.૬॥

ગુણદોષૈઃ સુખસ્યાપિ વૃદ્ધિ હ્રાસૌ વિમુક્તિગૌ ।
નૃણાં સુરાણાં મુક્તૌ તુ સુખં ક્લૃપ્તં યથાક્રમમ્ ॥ ૩.૭॥

॥ ઇતિ તૃતીયોऽધ્યાયઃ ॥

॥ અથ ચતુર્થોऽધ્યાયઃ ॥

ૐ વિષ્ણુર્બ્રહ્મ તથાऽદિત્યત્યેવં નિત્યમુપાસનમ્ ।
કાર્યમાપદ્યપિ બ્રહ્મ તેન યાત્યપરોક્ષતામ્ ॥ ૪.૧॥

પ્રારબ્ધકર્મણોऽન્યસ્ય જ્ઞાનાદેવ પરિક્ષયઃ ।
અનિષ્ટસ્યોऽભયસ્યાપિ સર્વસ્યાન્યસ્ય ભોગતઃ ॥ ૪.૨॥

ઉત્તરેષોત્તરેષ્વેવં યાવદ્વાયું વિમુક્તિગાઃ ।
પ્રવિશ્ય ભુઞ્જતે ભોગાંસ્તદન્તર્બહિરેવ વા ॥ ૪.૩॥

વાયુર્વિષ્ણું પ્રવિશ્યૈવ ભોગશ્ચૈવોત્તરોત્તરમ્ ।
ઉત્ક્રમ્ય માનુષા મુક્તિં યાન્તિ દેહક્ષયાત્સુરાઃ ॥ ૪.૪॥

અર્ચિરાદિ પઠા વાયું પ્રાપ્ય તેન જનાર્દનમ્ ।
યાન્ત્યુત્તમા નરોચ્ચાદ્યા બ્રહ્મલોકાત્સહાऽમુના ॥ ૪.૫॥

યથાસઙ્કલ્પભોગાશ્ચ ચિદાનન્દ શરીરિણઃ ।
જગત્સૃષ્ટ્યાદિવિશયં મહાસામર્થ્ય મપ્યૃતે ॥ ૪.૬॥

યથેષ્ટશક્તિમંતશ્ચ વિના સ્વાભાવિકોત્તમાન્ ।
અનન્યવશગાશ્ચૈવ વૃદ્ધિહ્રાસ વિવર્જિતાઃ ।
દુઃખાદિરહિતં નિત્યં મોદંતેऽવિરતં સુખમ્ ॥ ૪.૭॥

પૂર્ણપ્રજ્ઞેન મુનિના સર્વશાસ્ત્રાર્થસંગ્રહઃ ।
કૃતોऽયં પ્રીયતાં તેન પરમાત્મા રમાપતિઃ ॥ ૪.૮॥

નમો નમોऽશેષદોષદૂર પૂર્ણગુણાત્મને ।
વિરિઞ્ચિશર્વપૂર્વેડ્ય વન્દ્યાય શ્રીવરાય તે ॥ ૪.૯॥

॥ ઇતિ ચતુર્થોऽધ્યાયઃ ॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતં
બ્રહ્મસૂત્રાણુભાષ્યં સમ્પૂર્ણમ્
॥ ભારતીરમણમુખ્યપ્રાણંતર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ॥

*sarvashAstrArtha aNu bhAShya ( AnandatIrtha)*

pdf was typeset on November 21, 2022

Please send corrections to *sanskrit@cheerful.com*